**अभ्यासप्रश्नपत्रम् – 2020-21**

**Practice paper1**

**कक्षा – द्वादशी (XII)**

**संस्कृतम् (केन्द्रिकम्) कोड सं.- (322)**

**समयः – होरात्रयम्** **पूर्णांकाः – 80**

*कृपया सम्यक्तया परीक्षणं कुर्वन्तु यत् अस्मिन् प्रश्नपत्रे 13 पृष्ठानि सन्ति |
*कृपया सम्यक्तया परीक्षणं कुर्वन्तु यत् अस्मिन् प्रश्नपत्रे 19 प्रमुखाः प्रश्नाः सन्ति |
*अस्य प्रश्नपत्रस्य पठनाय 15 निमेषाः निर्धारिताः सन्ति | अस्मिन् कालावधौ केवलं प्रश्नपत्रं पठनीयम् उत्तरपुस्तिकायां च किमपि न लेखनीयम् |

**प्रश्नपत्रस्वरूपम् –**

**अ – भागः बहुविकल्पात्मक: 40 अङ्काः**

**आ – भागः वर्णात्मक: 40 अङ्काः**

(i) अस्मिन् पत्रे द्वौ भागौ स्तः |

(ii) अ–भागः बहुविकल्पात्मक: अस्ति |

(iii) आ–भागः वर्णनात्मक: अस्ति |

(iv) उत्तरलेखनात् पूर्वं प्रश्नस्य क्रमाङ्क: अवश्यं लेखनीयः |

(v) प्रश्नसंख्या प्रश्नपत्रानुसारम् अवश्यमेव लेखनीया |

(vi) सर्वेषां प्रश्नानाम् उत्तराणि संस्कृतेन लेखनीयानि |

(vii) प्रश्नानां निर्देशाः ध्यानेन अवश्यं पठनीयाः |

**1- भागः**

**बहुविकल्पात्मकाः प्रश्नाः 40 अङ्काः**

## अनुप्रयुक्तव्याकरणम्

1.अधोलिखितवाक्येषु रेखाङ्कितपदानां समुचितं संधिपदं संधिविच्छेदं वा प्रदत्तविकल्पेभ्यः चिनुत- (केवलं प्रश्नषट्कम्) 1x6=6

(i) <u>यान्यनवद्यानि</u> कर्माणि तानि सेवितव्यानि |

(क)यान् + यवद्यानि

(ख) यान्य + वद्यानि

(ग) यानि + अनवद्यानि

(ii) एकशरीरसंक्षिप्ता पृथिवी <u>रक्षितव्या+इति</u> |

(क)रक्षितव्यिति

(ख) रक्षितव्येति

(ग) रक्षितव्याति

(iii) <u>शैशवेऽभ्यस्तविद्यानां</u> रघूणाम् अन्वयं वक्ष्ये |

(क) शैशवे+अभ्यस्तविद्यानां

(ख) शैशवेऽभ्यस्त+विद्यानां

(ग) शैशवे+ऽभ्यस्तविद्यानां

(iv) <u>दौवरिकः+तु</u> तमाकृष्य नयन्नेव प्रचलितः |

(क) दौवरिकस्तु

(ख) दौवरिकश्तु

(ग) दौवरिकष्तु

(v) यद्यपि <u>देवादेशः</u> प्रमाणम् |

(क) देवा+देशः

(ख) देव+आदेशः

(ग) देवा+आदेशः

(vi) <u>अत्रैव</u> स्थित्वा श्रोष्यामि |

(क) अत्रै+व

(ख) अत्र+ऐव

(ग) अत्र+एव

(vii) यस्याः <u>शक्रसमः+भर्ता</u> |

(क) शक्रसमस्भर्ता

(ख) शक्रसमो भर्ता

(ग) शक्रसमर्भर्ता

2.अधोलिखितवाक्येषु रेखाङ्कितपदानां समुचितं समस्तपदं विग्रहवाक्यं वा प्रदत्तविकल्पेभ्यः चिनुत-
(केवलं प्रश्नपञ्चकम्) 1x5=5

(i) <u>धैर्यसागरः</u> लक्ष्मणः केन क्षोभितः |

(क)धैर्येण सागरः

(ख) धैर्यस्य सागरः

(ग) धैर्याय सागरः

(ii) दुष्टः उरगक्षता अङ्गुलीव त्याज्यः |

(क)उरगेण क्षता

(ख) उरगस्य क्षता

(ग) उरगे क्षता

(iii) दीर्घप्रयासेन कृतं हि वस्तु |

(क)दीर्घात् प्रयासेन

(ख) दीर्घेण प्रयासेन

(ग) दीर्घं प्रयासेन

(iv) तत्किमपि यथेच्छं पृच्छ |

(क)इच्छायाः अनुसारेण

(ख) यथा इच्छा

(ग) इच्छाम् अनतिक्रम्य

(v) परस्परमनुव्रतौ पतिपत्न्यौ त्रिवर्गं साधयतः |

(क)पतिः च पत्नी च

(ख) पति च पत्नयौ च

(ग) पती च पत्नयौ च

(vi) स्वशिशूनां चरित्रनिर्माणं मातुराधीनम् |

(क)चरित्रेण निर्माणम्

(ख) चरित्रस्य निर्माणम्

(ग) चरित्रात् निर्माणम्

(vii) कथं संयासिनोऽपि कठोरभाषणैः तिरस्करोसि |

(क)कठोरैः भाषणैः
(ख) कठोरस्य भाषणैः
(ग) कठोरं भाषणैः

3.अधोलिखितवाक्येषु रेखाङ्कितपदानां समुचितं संयोजितं विभाजितं वा प्रकृतिं प्रत्ययं प्रदत्तविकल्पेभ्यः चिनुत- (केवलं प्रश्नषट्कम्) 1x6=6

(i) राज्ञा हस्तेनैव विसर्जितः |

(क)वि+सर्ज+तः

(ख) वि+सृज्+क्त

(ग) वि+सर्जि+क्त

(ii) बली बलं वेत्ति न वेत्ति निर्बलः |

(क)बल+ई

(ख) बलि+ई

(ग) बल+इन्

(iii) कथा लोकेषु प्रसृता |

(क)प्रसृत+आ

(ख) प्रसृत+अ

(ग) प्रसृत+टाप्

(iv) अपौरूषेयं श्रुतिः |

(क)श्रु+क्तिन्

(ख) श्रु+ति

(ग) श्रुत+इ

(v) दैवी संपद् विमोक्षाय भवति |

(क)दैव+ई

(ख) दैव+ङीप्

(ग) देव+ई

(vi) अभिजातस्य सत्यम् अलोलुपत्वम् इति दैवी संपदं भवन्ति |

(क)अलोलुप+त्वम्

(ख) अलोलुप+तव

(ग) अलोलुप+त्व

(vii) प्रक्रितिसौन्दर्यम् अवलोकयन् शत्रुजितः प्रविशति |

(क)अव+लोक्+शतृ
(ख) अव+लोक्+यन्
(ग) अवलोक+शतृ
4.समुचितं उपपदविभक्तिरूपं चिनुत-(केवलं प्रश्नत्रयम्) 1x3=3

(i) आचार्येति पदं प्राप्य ........... जीवनकलां शिक्षयिष्यामि |

(क)शिष्यैः

(ख) शिष्येभ्यः

(ग) शिष्याणां

(ii) दौवारिक! इत आयाहि किमपि .......... कथयिष्यामि |

(क)कर्णात्

(ख) कर्णस्य

(ग) कर्णे

(iii) अतः परं मातुः ……… श्रोतुं न इच्छामि |

(क) परिवादं

(ख) परिवादाय

(ग) परिवादः

(iv) ………. न प्रमदितव्यम् |

(क) सत्यम्
(ख) सत्येन
(ग) सत्यात्

## पठितावबोधनम्

5.भाषिककार्यम् – निदेशानुसारम् उत्तराणि चिनुत- (केवलं प्रश्नषट्कम्) 1x6=6

(i) “पुनः गजेन्द्रारूढो भोजः राजभवनम् अगात्” अत्र विशेषणपदं किम्?

(क) भोजः

(ख) गजेन्द्रारूढो

(ग) राजभवनम्

(ii) “द्रौपदीं स्वीयां संपत्तिं मन्यमानः युधिष्ठिरः तां द्यूते हारितवान्” अत्र “तां” इति सर्वनामपदं कस्मै प्रयुक्तम्?

(क) द्रौपदीं

(ख) युधिष्ठिरः

(ग) द्यूते

(iii) “देव! लोकाः मां सर्वज्ञं कथयन्ति” अत्र ‘अल्पज्ञम्’ इत्यस्य विलोमपदं किम्?

(क) देव

(ख) लोकाः

(ग) सर्वज्ञम्

(iv) “त्वया भोजो भुवनेश्वरी-विपिने रात्रौ हन्तव्यः” अत्र ‘वने’ इत्यस्य पर्यायपदं किम्?

(क) त्वया

(ख) विपिने

(ग) रात्रौ

(v) “केवलं महाराजशिववीरस्याज्ञां वयं शिरसा वहामः” अत्र क्रियापदं किम्?

(क) वयम्

(ख) शिरसा

(ग) वहामः

(vi) “एकेनापि सुपुत्रेण विद्यायुक्तेन साधुना” अत्र विशेष्यपदं किम्?

(क) सुपुत्रेण

(ख) विद्यायुक्तेन

(ग) साधुना

(vii) “त्वं स्वज्ञानविज्ञानयोः प्रयोगं कर्तुं शक्ष्यसि” अत्र कर्तृपदं किम्?

(क) त्वं

(ख) प्रयोगं

(ग) शक्ष्यसि

6.अधोलिखितवाक्येषु रेखाङ्कितपदानां प्रसंगानुसारं समुचितम् उत्तरं चिनुत-(केवलं प्रश्नचतुष्टयम्) 1x4=4

(i) <u>क्रमेलकः</u> केलिवनं प्रविश्य कण्टकजालमेव निरीक्षते |

(क) गजः

(ख) उष्ट्रः

(ग) सिंहः

(ii) अजीर्णे <u>भेषजं</u> वारि |

(क) औषधम्

(ख) चिकित्सकः

(ग) जलम्

(iii) मदालसे <u>तूष्णीं</u> किमर्थं तिष्ठसि |

(क) क्रोधः

(ख) सुप्तः

(ग) शान्तः

(iv) ऋग्यजु:सामवेदास्त्रयी आथर्वणश्च <u>तुरीयः</u> |

(क) तृतीयः

(ख) चतुर्थः

(ग) पञ्चमः

## संस्कृतसाहित्येतिहासपरिचयः

7. समुचितस्य कवेः रचनायाः वा चयनं कुरुत-(केवलं प्रश्नत्रयम्) 1x3=3

(i) “प्रतिमानाटकस्य” रचयिता कः?

(क) भासः

(ख) भारविः

(ग) कालिदासः

(ii) बल्लालसेनेन कः ग्रन्थ: रचितः?

(क) पुरन्ध्रीपञ्चकम्

ख) शिवराजविजयम्

(ग) भोजप्रबन्ध:

(iii) अम्बिकादत्तव्यासस्य रचना का अस्ति?

(क) अभिज्ञानशाकुन्तलम्

(ख) पञ्चतन्त्रम्

(ग) शिवराजविजयम्

(iv) “पुरन्ध्रीपञ्चकम्” इत्यस्य लेखिका का?

(क) पण्डिता क्षमाराव
(ख) वेद कुमारी घई
(ग) प्रवेश सक्सेना
8.गद्य-पद्य-नाटक-विधानां समुचितं वैशिष्ट्यं चिनुत-

(केवलं प्रश्नत्रयम्) 1x3=3

(i) …….. गेयता भवति |

(क) पद्यकाव्ये

(ख) गद्यकाव्ये

(ग) नाट्ये

(ii) नाटके न्यूनातिन्यूनाः ………. अङ्काः भवन्ति |

(क) सप्त

(ख) षट्

(ग) पञ्च

(iii) नाटके मुख्यः .......... रसः भवति |

(क)हास्यः

(ख) वीरः

(ग) रौद्रः

(iv) गद्यकाव्यस्य .......... भेदौ स्तः |

(क)एकः

(ख) द्वौ

(ग) त्रयः

9.गद्य-पद्य-चम्पू-विधानां समुचितम् उत्तरं चिनुत-

(केवलं प्रश्नचतुष्टयम्) 1x4=4

(i) गद्यकाव्यं कीदृशं भवति?

(क) छन्दोरहितम्

(ख) छन्दोयुक्तम्

(ग) छन्दोसहितम्

(ii) महाकाव्यं कस्य भेदः अस्ति?

(क) गद्यकाव्यस्य

(ख) पद्यकाव्यस्य

(ग) चम्पूकाव्यस्य

(iii) गद्यपद्यमयं काव्यं भवति?

(क) गद्यकाव्यम्

(ख) पद्यकाव्यम्

(ग) चम्पूकाव्यम्

(iv) मात्राणाम् अक्षराणां निश्चिता संख्या कस्मिन् काव्ये भवति?

(क) गद्यकाव्ये

(ख) पद्यकाव्ये

(ग) चम्पूकाव्ये

(v) "ओजगुण:" कस्मिन् काव्ये प्राधान्येन भवति?

(क) गद्यकाव्ये

(ख) पद्यकाव्ये

(ग) चम्पूकाव्ये

## आ-भागः

## वर्णनात्मकाःप्रश्नाः अङ्काः – 40

## अपठितावबोधनम्

10. अधोलिखितं गद्यांशं पठित्वा दत्त-प्रश्नान् संस्कृतेन उत्तरत- 10

अधुना योगदर्शनस्य चर्चा सर्वत्र भवति | एतद् दर्शनं न केवलम् अतिप्राचीनम् अपितु नितान्तं वैज्ञानिकं दर्शनम्' अस्ति | महर्षिः पतञ्जलिः योगदर्शनम् उपदिष्टवान् | भारते एव योगदर्शनस्य आविर्भावः अभवत् | योगः देहात्मनोः प्रत्यक्षं वैज्ञानिकं साधनमस्ति | एतद्दर्शने शरीरस्य मनसः अपि नियमनं वर्णितम् | योगस्य परिभाषा अस्ति – "योगः चित्तवृत्तिनिरोधः" | चित्तवृतीनाम् अवरोधनेनैव योगस्य संसिद्धिः | अस्याम् अवस्थायां जीवः स्वरूपम् अधिगच्छति | योगस्य अष्ट अङ्गानि भवन्ति – यम-नियम-आसन-प्राणायाम-प्रत्याहार-धारणा-ध्यान-समाधयः चेति | अस्माभिः जीवने सदा योगः सेवनीयः यतः योगेन जीवने नीरोगता आयाति |

(अ) एकपदेन उत्तरत –(केवलं प्रश्नचतुष्टयम्) ½x4=2

(i) अधुना कस्य दर्शनस्य चर्चा सर्वत्र भवति ?

(ii) योगदर्शनं कः उपदिष्टवान् ?

(iii) योगस्य कति अङ्गानि सन्ति ?

(iv) कुत्र योगदर्शनस्य आविर्भावः अभवत् ?

(v) केषाम् अवरोधनेन योगस्य संसिद्धिः भवतिः ?

(आ)पूर्णवाक्येन उत्तरत –(केवलं प्रश्नद्वयम्) 2x2=4

(i) योगस्य परिभाषा का अस्ति ?

(ii) अस्माभिः जीवने किमर्थं योगः सेवनीयः ?

(iii) योगस्य अष्टाङ्गानां नामानि लिखत ?

(इ)गद्यांशस्य समुचितं शीर्षकं लिखत- 1x1=1

(ई)निर्देशानुसारम् उत्तरत –(केवलं प्रश्नत्रयम्) 1x3=3

(i) "तिरोभावः" इत्यस्य विलोमपदं किम् ?

(ii) "पुरातनम्" इत्यर्थे कः शब्दः अत्र प्रयुक्तः ?

(iii) "अधुना योगदर्शनस्य चर्चा सर्वत्र भवति" अत्र क्रियापदं किम् ?

(iv) "वैज्ञानिकं साधनम्" अत्र विशेषणपदं किं ?

## रचनात्मककार्यम्

11.प्रधानाचार्यं प्रति शुल्क-क्षमापनार्थं लिखितेऽस्मिन् प्रार्थनापत्रे रिक्तस्थानानि मञ्जूषायां प्रदत्त-पदानां सहायतया पूरयत- ½x10=5

(i)...........

प्रधानाचार्यः (ii).............

राजकीयः सर्वोदयः विद्यालयः

देहली |

महोदयः

सविनयं निवेदनम् अस्ति यत् (iii)..........पिता दिल्ली-सर्वकारे एकः चतुर्थश्रेणी (iv)........... अस्ति | तस्य मासिकः आयः अतीव (v).......... अस्ति | येन परिवारस्य (vi)............ काठिन्येन भवति | मम परिवारे माता पिता (vii).......... भ्रातरौ (viii)......... च भगिनी इति पञ्च सदस्याः सन्ति |अतः अहं भवन्तं (ix).......... यत् मम अध्ययन-शुल्कं क्षमापयत |

धन्यवादः भवदीयः (x)...........

दिनाङ्कः संजयः

**मञ्जूषा**

( न्यूनः, द्वौ, सेवायाम्, मम, एका, शिष्यः, निवेदयामि, कर्मचारी, निर्वाहः, महोदयः )

12. मञ्जूषाप्रदत्त-पदसहायतया अधोलिखितां कथां पूरयत- ½x10=5

एकदा एकः सज्जनः नद्याः विशाले (i)......... उपविशति स्म | तदैव सः अपश्यत्- एकः (ii).......... नद्याः गहने जले अपतत् | सज्जनः शीघ्रं गत्वा वृश्चिकं (iii).........गृहीतवान् | परं विषधरः वृश्चिकः (iv).......... हस्तं दंष्ट्वा पुनः जले अपतत् अवहत् च | साधुस्वभावः सन्तः पुनः तं वृश्चिकं (v)......... हस्ते गृहीतवान् | वृश्चिकोऽपि पुनः हस्तं (vi)............ जले अपतत् च | एतत् वारं वारम् अवलोक्य तत्रस्थितः एकः विस्मितः (vii).......... सन्तम् अपृच्छत्- हे साधो! एषः (viii).......... वृश्चिकः भवन्तं वारं वारं दंशति ततोऽपि भवान् तं त्रातुम् इच्छति | सन्तः विहस्य अवदत्- 'वृश्चिकस्य स्वभावोऽस्ति दंशनं साधोः स्वभावो भवति (ix).......... | यदि एषः दुस्वभावं न त्यजति तर्हि अहं किमर्थं (x)............ त्यजानि |

**मञ्जूषा**

( सज्जनस्य, दु:स्वभावः, तटे, रक्षणम्, वृश्चिकः, जनः, हस्ते, साधुस्वभावं, दन्ष्टवान्, त्रातुं )

**अथवा**

अधोलिखिते संवादे रिक्तस्थानानि पूरयत- 1x5=5

पिता - (दूरदर्शने स्त्रीं विमानचालकरूपेण दृष्ट्वा) अहो! कुत्र कुत्र न दृश्यते नारी|

पुत्री -अद्य नारी सर्वस्मिन् क्षेत्रे कार्यं कर्तुं समर्था |
पुत्रः -सत्यम् | हे पितः! किं प्राचीनकालेऽपि नारी सर्वं कर्तुं समर्था आसीत् ?
माता - आम् | (i) ........................................................ |
पुत्रः - किं प्राचीनकालेऽपि (ii) ............................................... ?
पिता - आम् | प्राचीनकालेऽपि नार्यः शिक्षां प्राप्तुं समर्थाः आसन् |
पुत्री - परं कदा (iii) ........................................... ?
माता - मध्यकाले एव नारीणां शिक्षां प्रति जनैः विरोधः कृतः |
पुत्रः - आम् | अस्माकं अध्यापिकया अपि पाठितं एतद् |
पिता - किं भवान् जानाति नारीणां (iv) ................................ ?
पुत्री - आम् | नारीणां पुनः उत्थानाय राजाराममोहनरायेण प्रयत्नः कृतः |
पुत्रः - किं (v) ......................................................... ?
माता - आम् | अस्माकं समाजसुधारकैः तु स्त्रीशिक्षायै अनेकाः संस्थाः संस्थापिताः |

13. "जीवने परिश्रमस्य महत्वम्" इति विषयमधिकृत्य पञ्चवाक्यमितम् अनुच्छेदं लिखत |
1x5=5
(मञ्जूषाप्रदत्तपदानां सहायता अपेक्षिता चेत् गृहीतव्या अन्यथा स्वयं चिन्तयित्वा स्वतन्त्ररूपेण लेखितव्यम् |)

**मञ्जूषा**

(परिश्रमेण, जीवने, सफ़लताम्, प्राप्नोति, क्षुधा, कठिनसमये, कदापि, दुःखी, अलसाः, लभन्ते, दुखम्, असफ़लताम्, उन्नतिं, अधिगच्छति, सुखं, सुखेन , शेते, परिश्रमिजनः)

**अथवा**

निम्नलिखितेषु केषाञ्चन पञ्चवाक्यानां संस्कृतेन अनुवादं
कुरुत-(केवलं वक्यपञ्चकम्) 1x5=5

1.छात्र विद्यालय में पढने आते हैं |

Students come to school to study.

2.पक्षी वृक्षों पर कूजते हैं |

Birds chirps on trees.

3.माता बच्चों की प्रथम गुरु होती है |

Mother is first teacher of children.

4.सैनिक देश की रक्षा करते हैं |

The soldiers protect the country.

5.किसान लोगों को अन्न देते हैं |

Farmers provide food to the people.

6.हमें पर्यावरण की रक्षा करनी चाहिये |

We must protect the environment.

7.जल ही जीवन है |

Water is life.

## पठितावबोधनम्

14. अधोलिखितं गद्यांशं पठित्वा तदाधारितान् प्रश्नान् संस्कृतेन उत्तरत- 3

शोकसन्तप्तो मुञ्जः प्रायश्चित्तं कर्तुं आत्मनो वह्नौ प्रवेशनं निश्चितवान् | राज्ञः वह्निप्रवेश-कार्यक्रमं श्रुत्वा वत्सराजः बुद्धिसागरं नत्वा शनैः शनैः प्राह- तात! मया भोजराजो रक्षित एवास्ति | पुनः बुद्धिसागरेण तस्य कर्णे किमपि कथितम्, यन्निशम्य वत्सराजः ततो निष्क्रान्तः | पुनः राज्ञो वह्निप्रवेशकाले कश्चन कापालिकः सभां समागतः | सभामागतं कापालिकं दण्डवत् प्रणम्य मुञ्जः प्रावोचत्– हे योगीन्द्र! मया हतस्य पुत्रस्य प्राणदानेन मां रक्षेति | अथ कापालिकस्तं प्रावोचत्- राजन्! मा भैषीः| शिवप्रसादेन सः जीवितो भविष्यति | तदा श्मशानभूमौ कापालिकस्य योजनानुसारं भोजः तत्र समानीतः| 'योगिना भोजो जीवितः'इति कथा लोकेषु प्रसृता|

(अ) एकपदेन उत्तरत-(केवलं प्रश्नद्वयम्) ½x2=1

(i) मुञ्जः किं कर्तुं आत्मनो वह्नौ प्रवेशनं निश्चितवान् ?

(ii) राज्ञः वह्निप्रवेशकाले क: सभां समागतः ?

(iii) भोजः कस्य प्रसादेन जीवितो भविष्यति ?

(आ) पूर्णवाक्येन उत्तरत- (केवलं प्रश्नैकम्) 2x1=2

(i) वत्सराजः बुद्धिसागरं नत्वा किं प्राह ?

(ii) लोकेषु का कथा प्रसृता ?

15. अधोलिखितं पद्यं पठित्वा तदाधारितान् प्रश्नान् संस्कृतेन उत्तरत- 3

अल्पज्ञ एव पुरुषः प्रलपत्यजस्रं
पाण्डित्यसंभृतमतिस्तु मितप्रभाषी |
कांस्यं यथा हि कुरुतेऽतितरां निनादं
तद्वत्सुवर्णमिह नैव करोति नादम् ||

(अ) एकपदेन उत्तरत- (केवलं प्रश्नद्वयम्) ½x2=1

(i) अतितरां निनादं कः करोति ?

(ii) अल्पज्ञः पुरुषः कथं प्रलपति ?

(iii) पाण्डित्यसंभृतमतिः कीदृशः भवति ?

(आ) पूर्णवाक्येन उत्तरत-(केवलं प्रश्नैकम्) 2x1=2

(i) कः पुरुषः अजस्रं प्रलपति ?

(ii) कांस्यवत् नादं कः न करोति ?

16. अधोलिखितं नाट्यांशं पठित्वा तदाधारितान् प्रश्नान् संस्कृतेन उत्तरत- 3

**कुण्डला** - परस्परप्रीतिमतोः भवतोः उपदेशस्य नास्ति कोऽपि अवकाशः, तदापि सखीस्नेहः मां भाषयति-' भर्त्रा भार्या भर्तव्या रक्षितव्या च | यतो हि धर्मार्थकामसिद्धये यथा भार्या भर्तुः सहायिनी भवति तथा न कोऽपि अन्यः | परस्परमनुव्रतौ पतिपत्न्यौ त्रिवर्गं साधयतः | पतिः यदि प्रभूतं धनम् अर्जयित्वा गृहमानयति तत् खलु पत्न्यभावे कुपात्रेषु दीयमानं क्षयमेति |

**ऋतध्वजः** - लक्ष्म्याः रक्षार्थं पत्न्याः सहयोगः अनिवार्यः |

**मदालसा** - कुण्डले! लक्ष्मीपूजायां न मे प्रवृतिः | यदि लक्ष्मीः पूज्या प्रिया च अतिथिवर्यस्य तदा इदानीमेव मे नमस्कारः |

(अ) एकपदेन उत्तरत- (केवलं प्रश्नद्वयम्) ½x2=1

(i) लक्ष्म्याः रक्षार्थं कस्याः सहयोगः अनिवार्यः ?

(ii) केन भार्या भर्तव्या रक्षितव्या च ?

(iii) परस्परप्रीतिमतोः भवतोः कस्य अवकाशः नास्ति

(आ) पूर्णवाक्येन उत्तरत- (केवलं प्रश्नैकम्) 2x1=2

(i) मदालसायाः कस्यां प्रवृतिः नास्ति ?

(ii) केषां सिद्धये भार्या भर्तुः सहायिनी भवति ?

17.अधोलिखितस्य पद्यस्य भावार्थं मञ्जूषा-प्रदत्तपदैः पूरयित्वा पुनः लिखत- ½x4=2

गुणी गुणं वेत्ति न वेत्ति निर्गुणः

बली बलं वेत्ति न वेत्ति निर्बलः |

पिको वसन्तस्य गुणं न वायसः

करी च सिंहस्य बलं न मूषकः ||

भावार्थः –

गुणीजनः अन्यस्य (i) .......... जानाति, गुणरहितः ज्ञातुं न शक्नोति यथा पिकः एव (ii) .......... माधुर्यं सौन्दर्यं च जानाति न तु काकः | एवमेव (iii) ......... एव बलिष्ठस्य जनस्य बलं वेत्ति यथा हस्तिः एव (iv) ........... बलं ज्ञातुं समर्थः भवति न तु मूषकः |

**मञ्जूषा**

( सिंहस्य, बलवान्, वसन्तस्य, गुणान् )

**अथवा**

प्रदत्त-भावार्थत्रयात् शुद्धं भावार्थं चित्वा लिखत-1x2=2

(1)"नैकेनापि समं गता वसुमती नूनं त्वया यास्यति |"
(i) एषा पृथिवी केनापि सह न गतवती निश्चितमेव त्वया सह गमिष्यति |
(ii) एषा पृथिवी अनेकैः सह गमिष्यति |
(iii) एषा वसुमती कदापि न गच्छति |
(2) "दैवी संपद्विमोक्षाय निबन्धायासुरी मता |"

(i) दैवी कल्याणं करोति असुरः बन्धनं ददाति |

(ii) दैवी संपदा मुक्तये भवति आसुरी संपदा च बन्धनाय भवति |

(iii) दैवी संपदा बन्धनाय भवति आसुरी संपदा च कल्याणाय भवति |

18.अधोलिखित-अन्वये रिक्तस्थानानि पूरयत- ½x4=2

अजीर्णे भेषजं वारि जीर्णे वारि बलप्रदम् |

भोजने चामृतं वारि भोजनान्ते विषापहम् ||
अन्वयः –

अजीर्णे (i)...........भेषजं जीर्णे वारि (ii)......... भोजने च वारि (iii)......... भोजनान्ते (iv).......... (भवति) |

**अथवा**

प्रश्नपत्रात् भिन्नं पाठ्यपुस्तकस्य श्लोकमेकं लिखित्वा तस्य भावार्थं लिखत | 2x1=2

19.'क' स्तम्भस्य वाक्यांशस्य 'ख' स्तम्भस्य वाक्यांशेन सह मेलनं कुरुत- ½x4=2

| **'क' स्तम्भः** | **'ख' स्तम्भः** |
|---|---|
| (i) त्यागाय संभृतार्थानां | केवलं जन्महेतवः \| |
| (ii) आकारसदृश: प्रज्ञः | स ताभ्यो बलिमग्रहीत् \| |
| (iii) स पिता पितरस्तासां | प्रज्ञया सदृशागमः \| |
| (iv)प्रजानामेव भूत्यर्थं | सत्याय मितभाषिणाम् \| |